वृंदावन द्वादशी व्रतं

वृंदावन द्वादशी व्रतं

तुलसी विष्णुविवाहविधिः
देशकालौ ततः स्मृत्वा गणेशं तत्र पूजयेत् |
पुण्याहं वाचयित्वाऽथ नांदीश्राद्धं समाचरेत् ||1||

वेदवाद्यादिनिर्घोषैः विष्णुमूर्तिं समानयेत् |
तुलस्या निकटे सा तु स्थाप्या चांतर्हिता घटैः ||2||

आगच्छ भगवन् देव अर्हयिष्यामि केशव |
तुभ्यं ददामि तुलसीं सर्वकामप्रदो भव ||3||

दद्याद् द्विवारमर्घ्यं च पाद्यं विष्टरमेव च |
ततश्चाचमनीयं च त्रिरुक्त्वा च प्रदापयेत् ||4||

पयो दधि घृतं क्षौद्रं कांस्यपात्रपुटे घृतं |
मधुपर्कं गृहाण त्वं वासुदव नमोऽस्तु ते ||5||

ततो ये स्वकुलाचाराः कर्तव्या विष्णुतुष्टये |
हरिद्रालेपनाभ्यंगः कार्यः सर्वं विधाय च ||6||

गोधूलि समये पूज्यौ तुलसीकेशवौ पुनः |
पृथक्पृथक्ततः कार्यौ सम्मुखं मंगलं पठेत् ||7||

इष्टदेशे भास्वरे तु संकल्पं तु समर्पयेत् |
स्वगोत्रप्रवरानुक्त्वा तथा त्रिपुरुषादिकं ||8||

अनादिमध्यनिधन त्रैलोक्यप्रतिपालक |
इमां गृहाण तुलसीं विवाहविधिनेश्वर ||9||

पार्वती बीजसंभूतां वृंदाभस्मनि संस्थितां |
अनादिमध्यनिधनां वल्लभां ते ददाम्यहं ||10||

पयोघृतैश्च सेवाभिः कन्यावद्वर्धितां मया |
त्वत्प्रियां तुलसीं तुभ्यं दास्यामि त्वं गृहाण भोः ||11||

एवं दत्वा तु तुलसीं पश्चात्तौ पूजयेत्ततः |
रात्रौ जागरणं कुर्यात् विवाहोत्सवपूर्वकं ||12||

प्रतिवर्षमिदं कुर्यात् कार्तिकव्रतसिद्धये |
ततः प्रभातसमये तुलसीं विष्णुमर्चयेत् ||13||

वह्नि संस्थापनं कृत्वा द्वादशाक्षरविद्यया |
पायसाज्य क्षौद्रतिलैः हुनेदष्टोत्तरं शतं ||14||

ततः स्विष्टकृतं हुत्वा दद्यात्पूर्णाहुतिं ततः |
आचार्यं च समभ्यर्च्य होमशेषं समापयेत् ||15||

चतुरो वार्षिकान्मासान् नियमं यस्य यत्कृतं |
कथयित्वा द्विजेभ्यस्तत् तथाऽन्यत्परिपूजयेत् ||16||

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो |
नूनं संपूर्णतां यातु त्वत्प्रसादात् जनार्दन ||17||

रेवतीतुर्यचरणे द्वादशीसंयुते नरः |
न कुर्यात्पारणां कुर्वन् व्रतं निष्फलतां व्रजेत् ||18||

ततो येषां पदार्थानां वर्जनं तु कृतं भवेत् |
चातुर्मास्येऽथवा तूर्जे ब्राह्मणेभ्यः समर्पयेत् ||19||

ततः सर्वं समश्नीयात् यद्यदुक्तं व्रते स्थितः |
दंपतिभ्यां सहैवात्र भोक्तव्यं वा द्विजैः सह ||20||

ततो भुक्तोत्तरं यानि गलितानि दलानि च |
तुलस्यास्तानि भुक्त्वा तु सर्वपापैः प्रमुच्यते ||21||

भोजनानंतरं विष्णोरर्पितं तुलसीदलं |
भक्षणात्पापनिर्मुक्तिः चांद्रायण शताधिकं ||22||

इक्षुखंडं तथा धात्रीफलं पूगीफलं तथा | |
भुक्त्वा तु भोजनस्यांते तस्योच्छिष्टं विनश्यति ||23||

एषु त्रिषु न भुक्तं चेदैककमपि येन तु |
ज्ञेयं उच्छिष्ट आवर्षं नरोऽसौ नात्र संशयः ||24||

ततः सायं पुनः पूज्यौ इक्षुवंशैश्च मंडितौ |
तुलसीवासुदेवौ च कृतकृत्यो भवेत्ततः ||25||

ततो विसर्जनं कुर्यात् दत्वा देयादिकं हरेः |
वैकुंठं गच्छ भगवन् तुलस्या सहितः प्रभो ||26||

मत्कृतं पूजनं गृह्य संतुष्टो भव सर्वदा |
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ||27||

यत्र ब्रह्मादयो देवाः तत्र गच्छ जनार्दन |
एवं विसृज्य देवेशं आचार्याय प्रदापयेत् ||28||

मूर्त्यादिकं सर्वमेव कृतकृत्यो भवेन्नरः |
प्रतिवर्षं करोत्येवं तुलस्युद्वाहनं शुभं ||29||

इह लोके परत्रापि विपुलं सद्यशो भवेत् |
प्रतिवर्षं तु यः कुर्यात् तुलसीकरपीडनं |
भक्तिमान् धनधान्यैश्च युक्तो भवति निश्चितं ||30||

इति सनत्कुमारसंहितांतर्गतं वृंदावनद्वादशीव्रतं संपूर्णं |